प्रयुदार्थः, पुं, (प्रयुदः अर्थो यस्य सः ।) प्रत्युत्क्रमः । इति प्रयोगार्थशब्दटीकायां रमानाथः । ३ । २ । २६ ।

प्रयोक्ता, [ऋ] पुं, (प्रयुनक्तीति । प्र+युज्+तृच् ।) उत्तमर्णः । यथा,—
"उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात् ॥"
इत्यमरः । २ । ९ । ५ ॥

त्रि, प्रयोगकर्त्ता । ( यथा रघुः । ५ । ५७ ।
"संमोहनं नाम सखे ! ममास्त्रं
प्रयोगसंहारविभक्तमन्त्रम् ।
गान्धर्वमादत्स्व यतः प्रयोक्तु-
र्नचारिहिंसा विजयश्च हस्ते ॥"
अनुष्ठाता । यथा, रघुः । ६ । ७६ ।
"पुत्त्रो रघुस्तस्य पदं प्रशास्ति
महाक्रतोर्विश्वजितः प्रयोक्ता ॥"
नियोगकर्त्ता । यथा, महाभारते । १३ । २३ । ६२ ।
"परदाराभिहर्त्तारः परदाराभिमर्षिणः ।
परदारप्रयोक्तारस्ते वै निरयगामिनः ॥"
नाट्याचार्य्यः । यथा, रघुः । १९ । ३६ ।
"स प्रयोगनिपुणः प्रयोक्तृभिः
सज्जघर्ष सह मित्रसन्निधौ ॥")

प्रयोगः, पुं, ( प्र+युज्+भावकर्म्मादौ यथायथं घञ् । ) कार्म्मणम् । वशीकरणम् । प्रयुक्तिः । (यथा, रघुः । २ । ४२ ।
"प्रत्यब्रवीच्चैनमिषुप्रयोगे
तत्पूर्व्वभङ्गे वितथप्रयत्नः ॥")
निदर्शनम् । इति मेदिनी । गे, ४४ ॥ ( यथा, पञ्चदश्याम् । ६ । ४३ ।
"स्वयमात्मेति पर्य्यायस्तेन लोके तयोः सह ।
प्रयोगो नास्त्यतः स्वत्वमात्मत्वञ्चान्यवारकम्॥"
घोटकः । इति शब्दमाला ॥ ( सामाद्युपायानुष्ठानम् । यथा, माघे । ११ । ६ ।
"चणशयितविबुद्धाः कल्पयन्तः प्रयोगानुदधिमहति राज्ये काव्यवद्दुर्विगाहे ॥"
अभिनयः । यथा, रघुः । १९ । ३६ ।
"स प्रयोगनिपुणः प्रयोक्तृभिः
सज्जघर्ष सह मित्रसन्निधौ ॥"
वृद्धेः ऋणदानम् । स तु धनप्राप्त्युपायेषु अन्यतमः । यथा, मनुः । १० । ११५ ।
"सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः ।
प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च ॥")

प्रयोगार्थः, पुं, (प्रयोगः अर्थः प्रयोजनं यस्य ।) प्रधानप्रयोगानुकूलं प्रयोजनानुष्ठानम् । तत्पर्य्यायः । प्रत्युत्क्रमः २ । इत्यमरः ।३।२।२६॥

प्रयोगी, [न्] त्रि, (प्रयोगोऽस्यस्येति । प्रयोग+"अत इनिठनौ ।" ५।२।११५ । इति इनिः ।) प्रयोगयुक्तः । ( यथा, अमरे । २ । ७ । २० ।
"समूह्यः परिचाय्योपचाय्यावग्नौ प्रयोगिणः॥")

प्रयोजकः, त्रि, ( प्रयुनक्ति प्रेरयति कार्य्यादौ भृत्यादीनिति । प्र+युज्+खुल् ।) प्रयोगकर्त्ता । नियोगकर्त्ता । स्वतन्त्रतत्प्रयोजको कर्त्ता इति मुग्धबोधव्याकरणम् ॥ ( यथा, राजतरङ्गिण्याम् । ६ । ११९ ।
"यान् द्रोहभीरून् सम्भाव्य संविभेजे यशस्करः
तस्य तत्तनयोच्छेदे त एवासन् प्रयोजकाः ॥"
नियन्ता । यथा, याज्ञवल्क्ये । १ । ५ ।
"शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः ॥")

प्रयोजनं, क्ली, (प्रयुज्यते इति । प्र+युज्+ल्युट्) कार्य्यम् । (प्रयुज्यतेऽनेनेति । प्र+युज्+करणे ल्युट् ।) हेतुः । इति मेदिनी । ने,१८३॥ यथा,
"सर्व्वस्यैव हि शास्त्रस्य कर्म्मणो वापि कस्यचित्
यावत् प्रयोजनं नोक्तं तावत् केन प्रगृह्यते ॥
सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते ।
ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥"
इति प्राञ्चः ॥
( 'प्रयोजनञ्च द्विविधं मुख्यं गौणञ्च । तत्र अन्येच्छानधीनेच्छाविषयत्वं मुख्यप्रयोजनत्वम् अन्येच्छाधीनेच्छाविषयत्वं गौणप्रयोजनत्वम् । तत्राद्यं सुखं तद्भोगो दुःखाभावश्च । द्वितीयं तदुपकारि शयनभोजनादि । तस्य मुख्यप्रयोजनेच्छयैव जन्याया इच्छाया विषयत्वात्तथात्वम् ।"इति मुक्तिवादे गदाधरः॥ उद्देश्यः । यथा
"अथ प्रयोजनम् । प्रयोजनं नाम यदर्थमारभ्यन्त आरम्भाः । यथा यद्यकालमृत्युरस्ति ततोऽहमात्मानमायुष्यैरुपचरिष्याम्यनायुष्यैः परिहरिष्यामि कथं न मामकालमृत्युः प्रसहेतेति ।"
इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)

प्रयोज्यः, त्रि, ( प्र+युज्+ण्यत् । 'प्रयोज्यनियोज्यौ शक्यार्थे ।" ७।३।६८ । इति निपातनात् साधुः । प्रयोक्तुं शक्यः । इति मुग्धबोधव्याकरणम् ॥ (यथा, मनुः । ३।१५९ ।
"वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्म्ममिच्छता ॥")
मूलधने, क्ली ॥

प्ररूढः, पुं, (प्ररोहत्यनेनेति । प्र+रुह+क्तः । ) जठरम् । इति मेदिनी । ढे, ८॥ (क्वचित् जरठोऽपि पाठः ॥)

प्ररूढः, त्रि, ( प्र+रुह+क्तः । ) बद्धमूलः । इति मेदिनी । ढे, ८॥ ( यथा भागवते । ४ । १३ । १ ।
"प्ररूढ़भावो भगवत्यधोक्षजे
प्रष्टुं पुनस्तं विदुरः प्रचक्रमे ॥")
जातः । (यथा, रघुः । १३ । ६ ।
"नाभिप्ररूढाम्बुरुहासनेन
संस्तूयमानः प्रथमेन धात्रा ॥")
प्रवृद्धः । इति शब्दरत्नावली ॥

प्ररोहः, पुं, (प्ररोहतीति । प्र+रुह+अच् ।) अङ्कुरः । इति हेमचन्द्रः । ४। १८५ ॥ (यथा, कुमारे । ५ । ६० ।
"द्रुमेषु सख्या कृतजन्मसु स्वयं
फलं तपःसाक्षिषु दृष्टमेष्वपि ।
न च प्ररोहाभिमुखोऽपि दृश्यते
मनोरथोऽस्याः शशिमौलिसंश्रयः ॥"
नन्दीवृक्षः । तत्पर्य्यायो यथा,—
"नन्दीवृक्षोऽश्वत्थभेदः प्ररोहो गजपादपः ।
स्थालीवृक्षः चयतरुः चीरो च स्यादनस्पतिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

प्रलपितः, त्रि, प्रपूर्व्वलपधातोः कर्म्मणि क्तः । कथितः । यथा, काव्यप्रकाशे ।
"जनस्थाने भ्रान्तं कनकमृगतृष्णान्वितधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् ॥"

प्रलम्बः, पुं, (प्रलम्बते इति । प्र+लम्ब+अच् । अतिदीर्घत्वादेव तथात्वम् ।)दैत्यभेदः । स च दनुपुत्त्रः मनुष्यवध्यः । यथा,—
"एकाक्ष ऋषभोऽरिष्टः प्रलम्बनरकौ तथा ।
इन्द्रबाधनकेशी च पुरः शङ्कोऽथ धेनुकः ॥
गविष्टिको गवाक्षश्च तालकेतुश्च वीर्य्यवान् ।
एते मनुष्यवध्यास्तु दनोः पुत्त्रान्वयाः स्मृताः"
इत्यग्निपुराणम् ॥
(अयं हि बलदेवेन निहतः । यथा, भागवते १० स्कन्धे १८ । अध्याये ।
"तत्रोपाहूय गोपालान् कृष्णः प्राह विहारवित् ।
हे गोपा विहरिष्यामो द्वन्द्वीभूय यथायथम् ॥
तत्र चक्रुः परिवृढौ गोपा रामजनार्द्दनौ ।
कृष्णसङ्घट्टिनः केचिदासन् रामस्य चापरे ॥
आचेरुर्विविधाः क्रीड़ा वाह्यवाहकलक्षणाः ।
यत्रारोहन्ति जेतारो वहन्ति च पराजिताः ॥"
"उवाह कृष्णो भगवान् श्रीदामानं पराजितः ।
वृषभं भद्रसेनस्तु प्रलम्बो रोहिणीसुतम् ॥
अविषह्यं मन्यमानः कृष्णं दानवपुङ्गवः ।
वहन् द्रुततरं प्रागादवरोहणतः परम् ॥
"अथागतस्मृतिरभयो रिपुं बलो
विहाय सार्थमिव हरन्तमात्मनः ।
रुषाहनच्छिरसि दृढ़ेन मुष्टिना
सुराधिपो गिरिमिव वज्ररंहसा ॥
स आहतः सपदि विशीर्णमस्तको
मुखाद्वमन् रुधिरमपस्मृतोऽसुरः ।
महारवं व्यसुरपतत् समीरयन्
गिरिर्यथा मघवत आयुधाहतः ॥")
वपुषः । पयोधरः । लताङ्कुरः । शाखा । हारभेदः । (भावे घञ्) प्रलम्बनम् । इति मेदिनी । बे१३॥(देशविशेषः । यथा,रामायणे२।६८।१२।
"न्यन्तेनापरतालस्य प्रलम्बस्योत्तरं प्रति ।
निषेवमाणास्ते जग्मुर्नदीं मध्येन मालिनीम् ॥"
लम्बमाने, त्रि । यथा, महाभारते १।१९५।१०।
"गूढ़ोत्तरांसान् भुजगेन्द्रभोग-
प्रलम्बबाहून् पुरुषप्रवीरान् ॥")

प्रलम्बघ्नः, पुं, (प्रलम्बं हन्तीति । हन्+कः । बलरामः इत्यमरः । १ । १ । २४ ॥

प्रलम्बभित्,पुं,(प्रलम्बं भिनत्तीति। भिद्+क्विप् बलरामः । इति हेमचन्द्रः । २ । १३८ ॥

प्रलम्बाण्डः,पुं,(प्रलम्बो लम्बमानः अण्डो यस्य ।) दीर्घाण्डकोषविशिष्टः । तत्पर्य्यायः । पुष्करः२ इति हेमचन्द्रः । ३ । १२१ ॥